National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(61): 298-301
© 2025 NJHSR
www.sanskritarticle.com

**राहुल शर्मा**
राष्ट्रीय संस्कृत विश्वविद्यालय,
तिरुपति, आंध्र प्रदेश

**Correspondence:**
**राहुल शर्मा**
राष्ट्रीय संस्कृत विश्वविद्यालय,
तिरुपति, आंध्र प्रदेश

# वेदोक्तं नक्षत्राणां परिज्ञानम्

## राहुल शर्मा

अत्र **"अभिश्यावं[1] न कुशनेमिरचं नक्षत्रेभिः पितरोधामपिशन्"** अत्र नक्षत्रशब्दस्योल्लेखः संदृश्यते अथ च **"अथोनक्षत्राणामेषामुपस्थेसोम[2] आहितः।"**

अत्राऽपि नक्षत्रस्य संकेतः प्राप्यते। शतपथब्राहाणे **"मघासु[3] हन्यन्ते गावः फल्गुनीषुब्युह्यते।"** अत्र मघा नक्षत्रस्य फल्गुनीनक्षत्रस्य च चर्चा दृश्यते। तैत्तिरीयसंहितायामेव नक्षत्राणां नामानि तेषां देवताश्च पठिताः सन्ति-

"कृत्तिका"[4] नक्षत्रमग्निर्देवताग्नेरूचस्थ प्रजापतेर्धातुः सोमस्यर्चे त्वा रूचे त्वा द्युते त्वा भासे त्वा ज्योतिषे त्वा रोहिणी नक्षत्रं प्रजापतिर्देवता मृगशीर्ष नक्षत्रं सोमोदेवताऽऽद्रनिक्षत्रं रूद्रो देवता पुनर्वसु नक्षत्रमदितिर्देवतातिब्योननक्षत्रं बृहस्पतिर्देवताऽऽश्लेषा नक्षत्रं सर्पदेवता मघानक्षत्रं पितरोदेवता फल्गुनी नक्षत्रमार्यमादेवता फल्गुनीनक्षत्रं भगोदेवता हस्तो नक्षत्रं सवितादेवता चित्रानक्षत्रमिन्द्रदेवता स्वातीनक्षत्रं वार्युर्देवता विशाखनक्षत्रमिन्द्राग्नीदेवता अनुराधानक्षत्रं मित्रोदेवता रोहिणीनक्षत्रमिन्द्रो-देवता विद्युतौनक्षत्रं पितरोदेवता अषाढानक्षत्रमापोदेवता अषाढानक्षत्रं विश्वेदेवादेवता श्रोणानक्षत्रं विष्णुर्देवता श्रविष्ठानक्षत्रं वसवोदेवता शतभिषनक्षत्रमिन्द्रोदेवता प्रोष्ठपदानक्षत्रमजएकपाद्देवता प्रोष्ठपदानक्षत्रमहिर्बुध्नियोदेवता रेवतीनक्षत्रं पूषादेवताऽश्रयुजर्जी नक्षत्रमश्विनौदेवता भरणीर्नक्षत्रं यमीदेवतापूर्णापश्चाद्यत्तेदेवाअदधुः।" अब स्पष्टं वक्तुं शक्यते यत् वैदिकवाङ्मये नक्षत्राणां सम्यक्तया ज्ञानं तेषां व्यावहारिकी प्रक्रिया च ज्ञातासीत्। तत्र सप्तविंशतिनक्षत्राणामष्टाविंशति नक्षत्राणां वा संस्थितिस्तदासीदिति मंत्राणामवलोकनेन विज्ञायते।

**अन्नं पूर्वा रासतों मे अषाढा उर्ज ये द्युत्तर आवहन्तु।**
**अभिजिन्मे[5] ग्रासतां पुण्यमेव श्रवणः श्रविष्ठाः कुर्वा सुपुष्टिम् ॥**

एवं बहुत्रस्थले प्रकरणवशात् नक्षत्राणां विवेचनं वैदिकवाङ्मये विद्यते। वैदिककाले ऋतुज्ञानं[6] भूमेः वर्तुलतत्त्वज्ञानं निराधारत्वश्च प्रतिपादितमस्ति।[7] एवं तत्र युगपद्धतिरपि संदृश्यते।

"देवानां[8] पूर्वयें युगेऽसतः सदजायता।" वं विश्वेयेमानुषायुगापान्तिमत्य[9] रिषः। "या ओषधिः[10] पूर्वाजाता देवेभ्यस्त्रियुगं पुरा" पूर्व त्रियुगं इत्यस्य व्याख्याकाराः सत्ययुगं त्रेतायुगं द्वापरयुगं च प्रकुर्वन्ति। अथ च पुरा त्रियुगं वर्तमानश्चेदं युगमर्थात एव सिद्धयति।

**"कलिः[11] शयानो भवति सञ्जिहानस्तु द्वापरः।**
**उत्तिष्ठस्वेता भवति कृतं सम्पद्यते चरश्चरैवेति चरैवेति॥"**

अनेन स्पष्टतया चतुर्युगानां नामानि सन्ति।

एवं द्वादशमासानां ज्ञानमृतुज्ञानम्, अयनज्ञानम्, पञ्चसंवत्सरात्मकयुग्ज्ञानम्, मास-पक्ष-तिथि ज्ञानम् विविध मुहूर्तादीनाञ्चज्ञानं वैदिककाले आसीदिति कृत्वा ज्यौतिषशास्त्रस्य सनातनतत्त्वं वेदवत् सिद्धयति। "स्वर्ग कामो यजेत" इत्यनेन स्वर्गाभीष्टफलप्राप्त्यर्थं यजनं भवति। तत्र यज्ञ यज्ञादिषु मंडपविधानं कुण्डनिर्माणपद्धतिस्तदा आसीदिति स्पष्टं वक्तुं शक्यते, यतोहि कस्मिन् कुण्डे आहूतिदानेन कीदृक् फलं भवतीति शास्त्रेषु प्रतिपादितमस्त्यैव।

तेन तदा ज्योतिषस्य सम्यकृतया विस्तारः स्यादितिवक्तुं शक्यते।

वस्तुतः वेदाः कस्याप्येकस्य विषयस्य प्रतिपादकाः न सन्ति, अपि च प्रकरणवशात् विभिन्नेषु स्थलेषु विषयाणां विवेचनं संदृश्यते। एतदर्थं एकत्रैव सर्वेषां ज्यौतिष सम्बन्धिविषयाणां वर्णनं नैव प्राप्यते।

अथ च वेदानां बहवः शाखाः विलुप्ताः संजाताः संभाव्यते यत् विलुप्तासु शाखासु ज्योतिषविषयाणां वर्णनं स्थादिति।

वास्तविकरूपेण शककालात् पूर्वस्य ज्यौतिषशास्त्रस्य सम्यक्तया तादृशं विवेचनं नैव समुपलभ्यते, यथा ज्यौतिषशास्त्रस्य वर्तमानकाले स्थितिरस्ति।

**वेदानां महत्त्वम्** संस्कृतसाहित्ये वेदानां स्थानं मूर्धन्यं विद्यते। मनुना उक्तं यत्-**वेदोऽखिलो धर्ममूलम्** तथा वेदाद्धर्मो हि निर्बभौ।

अत: भारतीय दर्शनस्य धर्मस्य च जीवनं वेदा एव सन्ति वेदानां अपौरुषयत्वे अनाद्यत्वे प्राचीनतमत्वे च नास्ति लेशमात्रमपि संदेहो विदुषाम् । आर्याणां सभ्यतासंस्कतिश्च वेदाधारिता वर्तते। वेदाः न केवलं भारतीयैरपितु वैदेशिकैरपि परमश्रद्धया पठिताः भारते तु वेदाध्ययनं परमावश्यकं सम्मतं यथोक्तं भाष्यकारेण पतञ्जलिना।

**"ब्राह्मणेन निष्कारणो धर्मः षडङ्गोवेदोध्येयो ज्ञेयश्च"**

यतो हि वेदेषु ज्ञानविज्ञानधर्मदर्शनसदाचारसंस्कृतिनैतिकसामाजिक राजनैतिकादिजीवनोपयोगि विषयाःसन्निहिताः सन्ति। स्मृतिपुराणा-दीनामपि वेदानुगामित्वं प्रसिद्धमेव। वेदाः भारतीयानां श्रेयप्रेयादीनां साधकाः सन्ति। मानवजीवनस्य धर्मसमाजव्यवहारादीनां बोधनाय वेदाः एव समर्थाः सन्ति। अतः वेदाः धर्म मूलतया समादृताः प्रतिष्ठिताः सन्ति। अत्र सम्पूर्णतया मानवजीवनोद्देश्यरूपाः धर्मार्थकाममोक्षाख्याः चत्वारः पुरूषार्थाः विवेचिताः अतः मन्यते यत् वैदिकवाङ्मये मानव जीवनोपयोगिनः सर्वे विषयाः सन्निविष्टाः सन्ति। अतः एवात्र भोगमोक्षयोः उभयोः सत्ता समं एव दृश्यते। वेदवाङ्मयस्य व्यापकत्वं परिमाणगौरवञ्च विख्यातम्। यो हि द्विजः वेदमनधीत्य अन्यत्रश्रमं करोति सः शूद्रत्वं प्राप्नोति इत्युक्तम् यथा-

योऽनधीत्य द्विजो वेदमन्यत्र कुरूतेश्रमम् ।[12]

स जीवन्नेव शूद्रत्वमाशुगच्छति सान्वयः ।।

तथा च भारतीयानां दृढविश्वासो वर्तते यत् वेदतत्वज्ञैरेव जनः ब्रह्मज्ञातुं शक्नोति यथा-

**वेदशास्त्रतत्वज्ञो यत्र कुत्राश्रमेवसन् ।**

**इहैवलोके तिष्ठन् स ब्रह्मभूयाय कल्पते ।।**

वेदवाङ्मयस्य काश्चन् विशिष्टताः सन्ति ताभिः विशिष्टताभिः वैदिकवाङ्मयस्य महत्त्वं जनमनसि सुप्रतिष्ठितं वर्तते। वेदानां ज्ञानं विना मानवः स्वचरमजीवनलक्ष्यं अधिगन्तुं न पारयति। अतः वैदिक वाङ्मयस्य स्थानं मानवजीवने महत्त्वपूर्ण विद्यते। समस्तब्रह्माण्डे ज्ञानस्य विमलाधारा सर्वासु दिशासु वेदेभ्यः एव प्रवाहिता। वेदाः न केवलं भारतीयानां अपितु समस्तविश्वस्य मानवानां अमूल्या धनराशि वर्तते।

वेदेभ्यः वयं ज्ञातुं शक्नुमः यदस्माकं पूर्वजाः केन प्रकारेण केन विचारेण केनविधिना स्वजीवनं यापितवन्तः। ते कासां क्रीडानां अवलम्बिनः आसन्, तेषां अर्चनीयाः के देवाः आसन् विवाहसम्बन्धोद्देश्यं किं केन विधिना यज्ञं कुर्वन्तः मंत्रान् विज्ञानञ्चाधिगतवन्तः। इत्यादिषु वैदिककालिकविषयेषु यदा जिज्ञासा समुद्भवति तदा एतेषां प्रश्नानां उत्तराणि वयं वेदेभ्यः ज्ञातुं शक्नुमः।

किञ्चाध्यात्मिकदर्शनस्य किंवा भारतीय षड्दर्शनानां उत्पत्ति विकासवैशिष्ट्यञ्च वेदसाहाय्येनैव ज्ञातुं शक्नुमः ।

वेदानां महत्तोपादेयता च भाषावैज्ञानिक दृष्ट्यापि विद्यते। वैदिकभाषामाध्यमेनैव वर्तमानकालिक भाषाविज्ञानं दृमूलं वर्तते। वैदिकभाषया एव भाषाविदां मध्ये प्रसूताः भेदाः निराकृताः भवन्ति। वर्तमान काले ये शब्दाः विकसिताः वर्तन्ते तेषां मूलं वैदिक भाषायां एव निहितं न केवलं भारतीयभाषायां अपितु समस्त विश्वस्य प्राचीनतमभाषाणां मूलं वैदिकभाषायां एवास्ति। अतः वेदानधीत्यैव भाषाविज्ञानस्य दृढमूलं प्रतिपादनं सम्भवति। वेदेषु भौतिकार्थेषु प्रयुज्यमानाः मंत्राः अभवन् इति वेदभाषानुशीलनेनैव ज्ञायते।

**अपौरूषेयाः वेदाः**- पाश्चात्याः विद्वांसः वेदान् ऋषिभिः प्रणीतान् मन्यन्ते किन्तु भारतीयाः तु वेदान् अपौरूषेयान् मन्वन्ते। अत्र कारणं यत् पाश्चात्यानां आधिभौतिक दृष्टिः सामान्यशब्दार्थमेव पश्यति अवगच्छति च। किन्तु वेदविचक्षणाः वेदान् ऋषिकृतान् मन्यन्ते। भारतीयविदुषां मतानुसारं ऋषयः वेदानां मन्त्रदृष्टारः आसन्। तपस्विनः वैदिकऋषयः स्वालोकिकयोगशक्त्या ध्याने वेदमन्त्रान् ददृशुः ततश्चते दृष्टं मंत्रं स्ववाण्या उच्चारितवन्तः। ऋषि शब्दस्य व्युत्पत्यापीदं तथ्यं सिद्धं भवति।

ऋषि शब्दस्य व्युत्पत्यानुसारं "ऋषतिपश्यति सः ऋषिर्भवति। अत एव ऋषि शब्दस्यार्थः मंत्र दृष्टाइति गृह्यते। ऋषिशब्दः इगुपधात्" किदित्यनेनौणादि केन सूत्रेण इनि प्रत्यये कृते ऋषिः शब्दः निष्पन्नो भवति निरूक्ते (उक्तं- "तद्येनास्त पयस्य मानन् ब्रह्मस्वयम्भव-भ्यानर्षत्")[13] अयमुल्लेखोऽपि ऋषीणां मंत्रदृष्टत्वं सिद्धयति। द्विविधो वेदः- मुख्यरूपेणवेदः द्विविधो मतः (1) मन्त्ररूपो (2) ब्राह्मण रूपश्चेति। मंत्राणां संग्रहः एवं संहिताशब्देन ज्ञायते। ब्राह्मणरूपो वेदविभागः संहिता भागस्य व्याख्यारूपो भवति। अयमेव ब्राह्मणरूपो वेदः यागस्वरूपबोधकत्वेन प्रसिद्धो वर्तते।

ब्राह्मण रूपो वेदोऽपि त्रिधा विभक्तः (1) ब्राह्मणम् (2) आरण्यकम् (3) उपनिदश्च। एतेषु त्रिषु भागेषु यज्ञस्वरूपबोधको ब्राह्मणभागः। अरण्येषु काननेषु पठिता यज्ञस्याध्यात्मिकं स्वरूपं विवेचयन्तः वेदविभागाः आरण्यकाः इति संज्ञया उच्यन्ते। वेदानां येषु भागेषु वेदानां ब्रह्मज्ञानपरकत्वं व्याख्यायते तेषां मोक्षसाधकत्वं व्याख्यायते ते उपनिषद् इति संज्ञया अभिधीयन्ते। अयमेव भागः वेदस्यन्तिमभागतया वेदान्तशब्देन व्यपदिश्यते। एवं प्रकारेण ब्राह्मणभागः वेदस्य गृहस्थानां कृते उपयोगी भवति आरण्यक भागः वानप्रस्थानां कृते उपयोगी भवति तथा च उपनिषद्भागः सन्यासीनां कृते उपयोगी भवतीति कैश्चिद् मन्यते।

भारतीय सांस्कृतिकज्ञानगङ्गायाः मूलस्त्रोतांसि वेदाः एव सन्ति। संसारे वेदसदृशोः दीपपुञ्जो अन्यत्र न दृश्यते यः न केवलं स्वदीस्या स्वयं प्रकाशितो भवति अपितु स्वप्रभाषयादीस्या समस्तभारतीय-साहित्यं वाङ्मयं प्रभाषयति ।

स्थूलरूपेण वेदशब्देन चत्वारो वेदाः संहिताभागाः मंत्रसंग्रहरूपाः गृहयन्ते एवं प्रकारेणैव वैदिक शब्देन वेदोत्तर-कालिकं समस्त वैदिकं वाङ्मयं गृह्यते वैदिकशब्दः वेदविषयक अनेकविधविज्ञानसामग्रीणां बोधको भवति एवमेव वैदिक सामग्री शब्देन ब्राह्मणारण्यक उपनिषद् षड्वेदाङ्गानि च सूच्यन्ते। वेदेभ्यः भिन्नाः अपि ते ग्रन्थाः वेदोद्धृता अतः वैदिक ग्रन्थाः एव उच्यन्ते। अतः वैदिक वाङ्मये चत्वारः वेदाः ब्राह्मणाः आरण्यकाः उपनिषदः षड्वेदाङ्गानि च गृहयन्ते।

अयं वैदिकविभागः न केवलं विषय सामग्री दृष्ट्या वर्तते अपितु ऐतिहासिक दृष्ट्यापि चत्वारोऽवेदाः पूर्ववैदिकयुगे परिगणिताः तथा उत्तरवैदिक युगे ब्राह्मारण्योपनिषद्यड्वेदाङ्गादयः ग्रन्थाः परिगण्यन्ते। आधुनिकैतिहासकाराः अनया रीत्यैव वैदिकवाङ्मयस्य विभाजनं विहितवन्तः ।

वैदिक वाङ्मस्य चत्वारो भागाः वेदानामङ्गभूताः सन्ति न पृथक्तया तेषामस्तित्वं वर्तते।

**वेदशब्दार्थ-** प्रायः वेदशब्दस्य प्रयोगो मन्त्रब्राह्मणयोः प्रतीकरूपेण क्रियते। आपस्तम्बे उल्लिखितम् -

'मन्त्र ब्राह्मणयोर्वेदनामध्येयम् "[14]

मन्त्रशब्दार्थ: येन यज्ञ यागानामनुष्ठानं सम्पन्नं भवति यत्र च देवतानां स्तुति विधानमुल्लिखितं भवति सः माननात् मन्त्र इति उच्यते ।

ब्राह्मणग्रन्थाः यज्ञानां विविधक्रियाकल्पा व प्रदर्शकाः ग्रन्थाः ब्राह्मणं इति अभिधीयन्ते। ब्राह्मणशब्दस्यार्थो विद्यते -

'वैर्धनं विस्तारो वा वितानो वा यज्ञ'

अयं ब्राह्मणनामकः वेदभागः त्रिधा विभक्तो भवति

(1) ब्राह्मण भागः (2) द्वितीयः आरण्यकभागः (3) तृतीयः उपनिषद

मन्त्र भागः वेदः किं वा संहिताभागः स्वरूप भेदात् त्रिधाव्यपदिश्यते

(1) ऋग्वेदः (2) यजुर्वेदः (3) सामवेदश्च ।

**ऋग्वेदार्थः-** यत्र अर्थदृष्ट्या पादव्यवस्था वर्तते तेषां छन्दो बद्धानां मंत्राणां संज्ञा ऋक् इति ज्ञेयम्। ऋचां समूहः एव ऋग्वेदः इतिशब्देन व्यपदिश्यते ।

**यजुर्वेदार्थः**- यजुः शब्दः यज्धातोः ङ्क्सि प्रत्यये विहिते निष्पद्यते यस्मिन् संहिता भागे यज्ञयागादिक्रियाकलापानुरोधेन मन्त्राणां संकलनं वर्तते सः वेदभागः यजुर्वेदः इति उच्यते ।

**सामवेदः शब्दार्थः-** यस्मिन् मन्त्रसंहिताभागे गीति रूपाः मन्त्राः। संकलिताः सः उपासना काण्डपरोवेदः सामवेदः इति उच्यते। मन्त्राणां त्रिविधसंकलनात् वेदत्रयी इतिनाम्नावेदाः सन्ति प्रसिद्धाः।

**संहितारूपवेद्विभागः-** मंत्राणां समूहः संकलनं वा संहिता शब्देन उच्यते। यज्ञानुष्ठानं दृष्टिपथि निधाय विभिन्नऋत्विजानां कृते संहिताभागस्य सङ्कलनं वेदव्यासेन विहितः वेदव्यासः वेदसंहितानां सङ्कलनं चतुर्विधतया कृतवान् तस्मात् चतस्त्रः संहिताः सन्ति (1) ऋग्वेद संहिता (2) यजुर्वेद संहिता (3) साम वेदसंहिता (4) अथर्ववेदसंहिता च। अतः संहिताभागस्य चतुर्विधत्वेन वेदाः चत्वारः स्मृताः।

**वेदकालः-** वैदिकवाङ्मयं अत्यन्तं प्राचीनतमं वर्तते। विभिन्न इतिहासकाराः भारतीयाः वैदेशिकाश्च वेदानां कालनिर्धारणे कृतभूरि परिश्रमाः अवलोक्यन्ते। यथा लोकमान्यतिलकमहोदयः ज्योतिर्विद्यायाः गणिताधारेण वेदानां कालं 6000 ईश्वीय पूर्वं निर्धारितवान्। अतः वेदेषु प्राचीनतमः वेदः ऋग्वेद ततोऽपि पूर्वकालिकः आसीदत्रनास्ति संदेहः।

वेदानां रचनायां जातायां वेदमंत्रभागस्य व्याख्यानपरायणाः ब्राह्मणग्रन्थाः विरचिताः। ब्रह्मण ग्रन्थेभ्यः पश्चात् आरण्यकग्रन्थाः ततश्च उपनिषदग्रन्थाः प्रणीताः ततश्च लौकिकसाहित्यं रामायण-महाभारतादिकं अस्तित्वे सामगतम् ।

वैदिक वाङ्मयं अतिव्यापकं विस्तृतं च विद्यते। इदं सर्वाङ्गपूर्णञ्चापि विद्यते। यतो हि वेदेषु मानवजीवनस्योद्देश्यतयाः धमार्थकाम-मोक्षनामकाः चत्वारः पुरूषार्थाः प्रदर्शिताः।

वैदिकवाङ्मयस्य प्राचीनतमकालिकत्वेन, विश्वव्यापित्वेन, दुष्परिच्छेदेन परिमाणेन, अत्यधिकवैभवेन, अद्वितीयाद्भूतत्वेन, काव्यात्मकसौंदर्येण, सांस्कृतिक व्यवहारोपयोगित्वेन, अत्र सर्वेषां मानवानां अभिनिवेशः जायते। न केवलं एतानि एव कारणानि वैदिकवाङ्मयमध्ययने विदुषां प्रवत्तेः अपितु वेदविद्याध्ययने जिज्ञासूनां छात्राणां अभिरूचिर्जायते।

वैदिक वाङ्मये मानवजीवनोपयोगिनः सर्वेविषया सम्यक्तया विवेचिताः इत्यस्मात् कारणात् अद्यापि वैदिक वाङ्मयं लोके समादृतम्। अत्र प्रेयशास्त्रं, श्रेयशास्त्रं च द्विविधम् समभावेन अनुस्यूतम्। अतएव योगमोक्षयोरूभयोः सत्तायाः कारणात् सकलान्यविधवाङ्मयापेक्षया वैदिकवाङ्मयं लोके सर्वाधिकप्रचारितं समादृतं व्यवहुतश्च दरीदृश्यते।

वैदिकवाङ्मयं एव भारोपीयभाषावर्गे (तमिल तेलगू मलयालम् कन्नडीति भाषाचतुर्वर्गवर्णं प्रायः समस्त भारतीयाः भाषाः यथापौवीत्याः तथा प्रायः सकल योरोपीय भाषाः पश्चिमायां वैदिक संस्कृतेन समन्विताः सन्तीतिकारणात् तासां वर्गो भाषा विज्ञाने भारोपीयभाषा परिवारः इति प्रसिद्धः। ज्येष्ठभाषायां लिखितः अस्मात् कारणात् वैदिकवाङ्मये प्राचीनतमसाहित्यस्य परिचयः सुरक्षितः। नात्र कस्यापि विविमतिः। वैदिक वाङ्मययाध्ययनेन धर्मप्रज्ञायाः उत्पत्तिः सक्रमोपत्चयश्च यथा जायते तथा अन्य साहित्याश्रयेण समस्त पृथिव्यामपि न जायते।

धर्मदर्शनयोरूभयोर्विकासस्य ज्ञानार्थं वैदिकवाङ्मयस्याध्ययनं अनिवार्य भवति। मेकडोनलस्तु उक्तवान् "भारोपीयभाषाभाषिषु जनेषु भारतीयैरेवकेवलं वैदिक धर्मा नाम महान् राष्ट्रिय धर्मः अस्य प्रतिपक्षी बौद्धधर्मो नाम महान् सार्वभौमधर्मश्च निरमायि। अप्रदर्शितधर्मविषयोपज्ञैर्जनान्तरैस्तु बहुतिथात्कालात्पूर्वमश्वदेशज एव धर्मः खलुरीकृतः अथ महतीमननशक्ति- मभिव्यञ्जनयन्ति स्वोपज्ञानि विविधदर्शनप्रस्थानानि अपि भारतीयैः सन्ततानि ज्ञान समृद्धं वैदिकवाङ्मयं इति विशेषता अन्यवाङ्मयेभ्यः। ईशा प्राक्चतुर्थशताब्द्यां भारतवर्षेसञ्जातात् यवनाक्रमणात् पूर्वं निश्चितरूपेण आर्यसभ्यता प्रौढतामाप्नोत् किन्तु तस्मात् कालादपि देशान्तरस्य धर्मदर्शनस्य संसर्गदोषः आर्य सभ्यतासंस्कृती न समागतः। सम्प्रति उपलभ्यमाणं वैदिक वाङ्मयं परिमाणदृष्ट्यापि एकीकृतं समग्ररोमयवनद्वयोः संस्कृतयोः वाङ्मयात् अतिशेते। मेकडोनलेन पुनः उक्तम्-

"सर्वेषां सनातनानां साहित्यानां मध्ये वैदिकवाङ्मयं मौलिकता-मूल्येन सौंदर्य गुणप्रकर्षेण च महत्त्वपूर्ण पदमवाप। मानवप्रकृति-विकासानुशीलस्य प्रधानसाधनता तु वेदेषु अन्य वाङ्मयेभ्यो निःसंशयं उत्कृष्टा एव"

**वैदिकवाङ्मयं लौकिकसंस्कृतवाङ्मयात् पृथग्भूतम्**

भारतीय साहित्येतिहासः वैदिककालः लौकिक कालश्च इति रूपेण कालद्वयेन विभज्यते। पाणिनेः वाल्मीकेः पूर्व प्रथम वैदिकवाङ्मय-कालः ततः परमश्च लौकिक वाङ्मयकालः गण्यते।

वैदिक वाङ्मये वेदाः बाह्मणगन्धाः आरण्यकग्रन्थाः उपनिषद्ः, षड्वेदाङ्गानि च समावेश्यन्ते। अस्मिन् वाङ्मये आर्य सभ्यतायाः संस्कृतेश्च विलक्षणा सातत्यता गतिश्च अवलोक्यते। अत्र वैदिकवाङ्मये प्रार्थनोपासना, मन्त्रजपः, मातृदेहाज्जन्मग्रहणादारभ्य शरीरत्याग-पर्यन्तं जीवनं विशिष्टं कुर्वन्तः षोडशसंस्काराः अरणीभ्यो हव्यवाहोत्पत्तिः श्रौतगृह्यसूत्राणि बहुनि अन्यविधयः ईश्वीयात् बहुपूर्व अत्रनिर्दिष्टं किन्तु अद्यापि भारतीयाः तं वैदिक वाङ्मयोक्तविधि-मनतिक्रम्यैव जीवने प्रवर्तन्ते।

अत्र **"अभिश्यावं[15] न कुशनेमिरचं नक्षत्रेभिः पितरोधामपिशन्"** अव नक्षत्रशब्दस्योल्लेखःसंदृश्यते अथ च **"अथोनक्षत्राणामेषामुपस्थेसोम[16] आहितः।"**

अत्राऽपि नक्षत्रस्य संकेतः प्राप्यते। शतपथन्ब्राह्मणे "मघासु[17] हन्यन्ते गावः फल्गुनीषुब्युह्यते।" अत्र मघा नक्षत्रस्य फल्गुनीनक्षत्रस्य च चर्चा दृश्यते। तैत्तिरीयसंहितायामेव नक्षत्राणां नामानि तेषां देवताच पठिताः सन्ति-

"कृत्तिका नक्षत्रमग्निर्देवताग्नेरूचस्थ प्रजापतेर्धातुः सोमस्यचें त्वा रूचे त्वा द्युते त्वा भासे त्वा ज्योतिषे त्वा रोहिणी नक्षत्रं प्रजापतिर्देवता मृगशीर्षं नक्षत्रं सोमोदेवताऽऽद्रनिक्षत्रं रूद्रो देवता पुनर्वसू नक्षत्रमदितिर्देवतातिब्योननक्षत्रं बृहस्पतिर्देवताऽऽश्लेषा नक्षत्रं सर्पदेवता मधानक्षत्रं पितरोदेवता फल्गुनी नक्षत्रमार्यमादेवता फल्गुनीनक्षत्रं भगोदेवता हस्तो नक्षत्रं सवितादेवता चित्रानक्षत्र-मिन्द्रदेवता स्वातीनक्षत्रं वार्युर्देवता विशाखनक्षत्रमिन्द्राग्नीदेवता अनुराधानक्षत्रं मित्रोदेवता रोहिणीनक्षत्रमिन्द्रिोदेवता विद्युतौनक्षत्रं पितरोदेवता अषाढानक्षत्रमापोदेवता अषाढानक्षत्रं विश्वेदेवादेवता श्रोणानक्षत्रं विष्णुर्देवता श्रविष्ठानक्षत्रं वसवोदेवता शतभिषनक्षत्र-मिन्द्रोदेवता प्रोष्ठपदानक्षत्रमजएकपाद्देवता प्रोष्ठपदानक्षत्रम-हिर्बुध्नियोदेवता रेवतीनक्षत्रं पूषादेवताऽश्र्युजर्जी नक्षत्रमश्विनीदेवता भरणीर्नक्षत्रं यमोदेवतापूर्णापश्चाद्यत्तेदेवाअदधुः।" अत्र स्पष्टं वक्तुं शक्यते यत् वैदिकवाङ्मये नक्षत्राणां सम्यक्तया ज्ञानं तेषां व्यावहारिकी प्रक्रिया च ज्ञातासीत्। तत्र सप्तविंशतिन-क्षत्राणामष्टाविंशति नक्षत्राणां वा संस्थितिस्तदासीदिति मंत्राणा-मवलोकनेन विज्ञायते।

**अन्नं पूर्वा रासतां मे अषाढा उर्ज ये द्युत्तर आवहन्तु।**
**अभिजिन्मे[18] रासतां पुण्यमेव श्रवणः श्रविष्ठाः कुर्वा सुपुष्टिम्॥**

एवं बहुत्रस्थले प्रकरणवशात् नक्षत्राणां विवेचनं वैदिकवाङ्मये विद्यते। वैदिककाले ऋतुज्ञानं भूमेः वर्तुलत्त्वज्ञानं निराधारत्वञ्च प्रतिपादित-मस्ति। एवं तत्र युगपद्धतिरपि संदृश्यते।

"देवानां पूर्व्ये युगेऽसतः सदजायत।" वं विश्वेयेमानुषायुगापान्तिमत्वं रिषः। "या ओषधिः पूर्वाजाता देवेभ्यस्त्रियुगं पुरा" पूर्व त्रियुगं इत्यस्य व्याख्याकाराः सत्ययुगं त्रेतायुगं द्वापरयुगं च प्रकुर्वन्ति। अथ च पुरा त्रियुगं वर्तमानश्चेदं युगमर्थात एव सिद्धयति।

**"कलिः[19] शयानो भवति सञ्जिहानस्तु द्वापरः।**
**उत्तिष्ठंस्वेता भवति कृतं सम्पद्यते चरश्चरैवेति चरैवेति।।"**

अनेन स्पष्टतया चतुर्युगानां नामानि सन्ति। एवं द्वादशमासानां ज्ञानमुतुज्ञानम्, अयनज्ञानम्, पञ्चसंवत्सरात्मकयुग्ज्ञानम्, मास-पक्ष-तिथि ज्ञानम् विविध मुहूर्तादीनाञ्चज्ञानं वैदिककाले आसीदिति कृत्वा ज्यौतिषशास्त्रस्य सनातनतत्त्वं वेदवत् सिद्धयति।

"स्वर्ग कामो यजेत" इत्यनेन स्वर्गाभीष्टफलप्राप्त्यर्थं यजनं भवति। तत्र यज्ञ यज्ञादिषु मंडपविधानं कुण्डनिर्माणपद्धतिस्तदा आसीदिति स्पष्टं वक्तुं शक्यते, यतोहि कस्मिन् कुण्डे आहूतिदानेन कीदृक् फलं भवतीति शास्त्रेषु प्रतिपादितमस्त्येव। तेन तदा ज्योतिषस्य सम्यक्तया विस्तारः स्यादितिवक्तुं शक्यते।

वस्तुतः वेदाः कस्याप्येकस्य विषयस्य प्रतिपादकाः न सन्ति, अपि च प्रकरणवशात् विभिन्नेषु स्थलेषु विषयाणां विवेचनं संदृश्यते। एतदर्थं एकत्रैव सर्वेषां ज्यौतिष सम्बन्धिविषयाणां वर्णनं नैव प्राप्यते। अथ च वेदानां बहवः शाखाः विलुप्ताः संजाताः संभाव्यते यत् विलुप्तासु शाखासु ज्योतिषविषयाणां वर्णनं स्यादिति।

**पाद टिप्पणी:**

[1]ऋ.सं. 10.68.11
[2]तत्रैव, 10.85.2
[3]शत.ब्रा. 2.1.11
[4]तै.सं. 4.4.10
[5]अथ.सं., 19.7
[6]ऋ.सं., 1.95.3
[7]ऐ.ब्रा., 14.6
[8]ऋ.सं., 10.72.2
[9]तत्रैव., 5.52.4
[10] तत्रैव., 10.97.1
[11] ऐ.ब्रा., 33.15
[12] मनुस्मृति
[13] निरुक्तेयास्काचार्यः
[14] आपस्तम्ब
[15] ऋ.सं.10.68.11
[16] तत्रैव, 10-85-2
[17] शत.ब्रा., 2.1.11
[18] अथ.सं., 19.7
[19] ऐ.ब्रा., 33.15